शकुनीश्वरः, पुं, ( शकुनीनां पक्षिणामीश्वरः । ) गरुडः । इति धनञ्जयः ॥

शकुन्तः, पुं, ( शक्नोति उत्पतितुमिति । शक + "शकेरुनोन्तोन्त्युनयः ।" उणा० ३।४९ । इति उन्तः । ) पक्षी । इत्यमरः ॥ ( यथा, महाभारते । १ । ७२ । ११ ।
"नेमां हिंस्युर्वने बालां क्रव्यादा मांसगृद्धिनः ।
पर्य्यरक्षन्त तां तत्र शकुन्ता मेनकात्मजाम् ॥")
कीटभेदः । भासपक्षी । इति मेदिनी ॥

शकुन्तला, स्त्री, ( शकुन्तैः पक्षिभिर्लाल्यते पाल्यते इति । ला + घञर्थे कः । स्त्रियामाप् । ) मेनकाप्सरःसु विश्वामित्रेण जनिता कन्या । सा कण्वमुनिना प्रतिपालिता । दुष्मन्तराजेन विवाहिता । अस्याः पुत्त्रो भरतः राजचक्रवर्त्ती । अस्या नामकारणं यथा,—
"निर्जने तु वने यस्मात् शकुन्तैः परिरक्षिता ।
शकुन्तलेति नामास्याः कृतञ्चापि ततो मया ॥"
इति महाभारते ।१।७२।१५॥
अस्या विवरणं कालिदासकृताभिज्ञानशकुन्तलनाटके द्रष्टव्यम् । पाद्मे स्वर्गखण्डे प्रथमादिपञ्चाध्यायेषु महाभारते आदिपर्व्वणि ६९ अध्यायमारभ्य च ज्ञातव्यम् ॥

शकुन्तलात्मजः, पुं, (शकुन्तलाया आत्मजः पुत्त्रः ।) भरतराजः । यथा,—
"दौष्मन्तिर्भरतः सर्व्वदमः शकुन्तलात्मजः ॥"
इति हेमचन्द्रः ॥

शकुन्तिः, पुं, ( शक्नोति उत्पतितुमिति । शक + उन्तिः । ) पक्षिमात्रम् । इत्यमरः ॥ ( यथा, ऋग्वेदे । २ । ४२ । ३ ।
"अवक्रन्द दक्षिणतो गृहाणां
सुमङ्गलो भद्रवादी शकुन्ते ! ॥" )
भासपक्षी । इत्युणादिकोषः ॥

शकुलः, पुं, ( शक्नोति गन्तुं वेगेनेति । शक + "मद्गुरादयश्च ।" उणा० १ । ४२ । इति उरच् । रस्य लः । ) मत्स्यविशेषः । इत्यमरः ॥ शउल इति भाषा ॥ (यथा, महाभारते । १२ । १३७ । ३ ।
"नातिगाधे जलाधारे सुहृदः शकुलास्त्रयः ।
प्रभूतमत्स्ये कौन्तेय ! बभूवुः सहचारिणः ॥")
अस्य गुणाः । मधुरत्वम् । रूक्षत्वम् । ग्राहित्वम् । पित्तामजित्त्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥

शकुलगण्डः, पुं, (शकुलस्य गण्ड इव गण्डो यस्य ।) शालमत्स्यः । इति त्रिकाण्डशेषः ॥

शकुलाक्षकः, पुं, श्वेतदूर्व्वा । इत्यमरः ॥

शकुलाक्षी, स्त्री, गण्डदूर्व्वा । इति राजनिर्घण्टः ॥

शकुलादनी, स्त्री, ( शकुलानां अदनं यस्याः । ङीप् । ) चक्राङ्गी । इत्यमरः ॥ कट्की इति भाषा ॥ कच्छटशाकः । इति मेदिनी ॥ काँचड़ादाम इति भाषा ॥ मांसी । किञ्चुलिका । जलपिप्पली । कट्फलः । इति विश्वः ॥ गजोषणा । इति राजनिर्घण्टः ॥

शकुलार्भकः, पुं, ( शकुलस्य अर्भक इव । ) गड़कमत्स्यः । इत्यमरः ॥ (गडुइमाछ इति भाषा ॥)

शकुली, स्त्री, ( शकुल + ङीष् । ) मत्स्यविशेषः । स्गाल् इति भाषा । महाशकुल इति केचित् । अस्या आकारो गुणाश्च ।
"शकुली रोहिताकारा भूमौ प्रायश्चरत्यसौ ।
गुर्व्वी पाके च मधुरा मेदिका दोषकोपना ॥"
इति राजवल्लभः ॥
पुस्तकान्तरे शकली इति च पाठः ॥ ( नदीविशेषः । यथा, मार्कण्डेये । ५७ । २३ ।
"सुमेरुजा शुक्तिमती शकुली त्रिदिवा क्रमुः ।
ऋक्षपादप्रसूता वै तामाख्या वेगवाहिनी ॥")

शकृत्, क्ली, ( शक्नोति मर्त्तुमिति । शक् + "शकेः ऋतिन् ।" उणा० ४ । ५८ । इति ऋतिन् । ) विष्ठा । इत्यमरः ॥ (यथा, भागवते ।३।३०।१९।
"स दृष्ट्वा त्रस्तहृदयः शकृन्मूत्रं विमुञ्चति ॥")

शकृत्करिः, पुं स्त्री, (शकृत् करोतीति । शकृत् + कृ + "स्तम्बशकृतोरिन् ।"३।२।२४। इति इन् ।) वत्सः । इत्यमरः ॥ दन्त्यादिरिति विद्याविनोदः ॥

शकृत्कारः, त्रि, मलत्यागकारकः । शकृत् करोतीत्यर्थे शकृच्छब्दात् कृधातोः घण् (अण्) प्रत्ययेन निष्पन्नः ॥

शकृद्द्वारं, क्ली, ( शकृतो द्वारम् । ) मलद्वारम् । तत्पर्य्यायः । अपानम् २ पायुः ३ गुदम् ४ च्युतिः ५ अधोमर्म्म ६ त्रिवलीकः ७ वली ८ । इति हेमचन्द्रः ॥

शक्करः, पुं, वृषः । इति हेमचन्द्रः ॥

शक्करिः, पुं, वृषः । इति त्रिकाण्डशेषः ॥

शक्करी, स्त्री, छन्दोभेदः । नदीभेदः । मेखला । इति मेदिनी ॥ सा च समवृत्तषड्विंशतिच्छन्दोऽन्तर्गतचतुर्द्दशच्छन्दः । यथा,—
"उक्थात्युक्था तथा मध्या प्रतिष्ठान्या
सुपूर्व्विका ।
गायत्त्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ॥
त्रिष्टुप् च जगती चैव तथातिजगती मता ।
शक्करी सातिपूर्व्वा स्यादष्टात्यष्टी तथा मता ॥
धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः ।
विकृतिः संकृतिश्चापि तथा चैवातिसत्कृतिः ॥
इत्याख्याः समवृत्तानां छन्दसां क्रमशः कृताः ॥"
तत्र चतुर्द्दशाक्षरपादसमच्छन्दांसि सन्ति । तेषां नामानि गणाश्च यथा ।
मो गो गो नौ मः शरनवभिरसंवाधा । १ ।
ज्ञेयं वसन्ततिलकं तभजा जगौ गः । २ ।
ननरसलघुगैः स्वरैरपराजिता । ३ ।
ननभनलगिति प्रहरणकलिका । ४ ।
मसौ गो मो गौ यदि गदिता वासन्तीयम् ।५।
द्विः सप्त च्छिदि लोलामसौ म्भौ गौ चरणे चेत् ।६।
स्वरभिदि यदि नौ तौ च नान्दीमुखीयम् ।७।
इति छन्दोमञ्जरी ॥
एतेषामुदाहरणानि बाहुल्यभिया नोक्तानि ॥

शक्तः, त्रि, (शक + क्तः ।) शक्तिविशिष्टः । समर्थः । तत्पर्य्यायः । सहः २ क्षमः ३ प्रभुः ४ उष्णुः ५ । इति हेमचन्द्रः ॥ (यथा, मनुः । ९ । २०७ ।
"भ्रातॄणां यस्तु नेहेत धनं शक्तः स्वकर्म्मणा ।
न निर्भाज्यः स्वकादंशात् किञ्चिद्दत्त्वोपजीवनम् ॥")
प्रियंवदः । इति शक्तशब्दटीकायां स्वामी ॥

शक्तवः, पुं भूम्नि, भ्रष्टयवादिचूर्णम् । छातु इति भाषा । यथा,—
"धाना भ्रष्टयवे भूम्नि स्त्रियां पुंभूम्नि शक्तवः ।
केचित्तु शक्तुरस्त्रीति वन्धुरा भूमनि स्त्रियाम् ॥"
इति जटाधरः ॥
अस्य विवरणं शक्तुशब्दे द्रष्टव्यम् ॥

शक्तिः, स्त्री, ( शक + क्तिन् । ) कार्य्यजननसामर्थ्यम् । यथा,-
"या देवी सर्व्वभूतेषु शक्तिरूपेण संस्थिता ।"
इति देवीमाहात्म्यस्य टीकायां नागोजीभट्टः ॥
शक्यते जेतुमनया । सा प्रभावोत्साहमन्त्रजभेदात्त्रिविधा । तत्र प्रभुत्वे साधकत्वात् कोषदण्डौ प्रभुशक्तिः १ । विक्रमेण स्वशक्त्या विस्फुरणमुत्साहशक्तिः २ । सन्ध्यादीनां सामादीनाञ्च यथावस्थानं मन्त्रशक्तिः ३ ॥ सामर्थ्यमात्रम् । तत्पर्य्यायः । द्रविणम् २ तरः ३ सहः ४ बलम् ५ शौर्य्यम् ६ स्थाम ७ शुष्मम् ८ पराक्रमः ९ प्राणः १० । इत्यमरः ॥ शुष्म ११ सहम् १२ । इति शब्दरत्नावली ॥ ऊर्ज्जः १३ । इति जटाधरः ॥ कासूः । सा तु शल्वलानामास्त्रम् । इति नानार्थे अमरभरतौ ॥ गौरी । इति मेदिनी ॥ लक्ष्मीः । इति शब्दमाला ॥ * ॥
त्रिशक्तयो यथा,—
"एषा त्रिशक्तिरुद्दिष्टा नयसिद्धान्तगामिनी ।
एषा श्वेता परा सृष्टिः सात्त्विकी ब्रह्मसंस्थिता ॥
एषैव रक्ता रजसि वैष्णवी परिकीर्त्तिता ।
एषैव कृष्णा तमसी रौद्री देवी प्रकीर्त्तिता ॥
परमात्मा यथा देवो एक एव त्रिधा स्थितः ।
प्रयोजनवशाच्छक्तिरेकैव त्रिविधाभवत् ॥"
इति वाराहे त्रिशक्तिमाहात्म्यनामाध्यायः ॥ * ॥
अपि च ।
"बिन्दुः शिवात्मकस्तत्र बीजं शक्त्यात्मकं
स्मृतम् ।
तयोर्योगे भवेन्नादस्तेभ्यो जातास्त्रिशक्तयः ॥"
इति क्रियासारः ॥
अन्यच्च ।
"इच्छा क्रिया तथा ज्ञानं गौरी ब्राह्मी तु वैष्णवी ।
त्रिधा शक्तिः स्थिता यत्र तत्परं ज्योतिरो-
मिति ॥"
इति गोरक्षसंहिता ॥ * ॥
अष्ट शक्तयो यथा,—
"इन्द्राणी वैष्णवी शान्ता ब्रह्माणी ब्रह्मवादिनी ।
कौमारी नारसिंही च वाराही विकटाकृतिः ॥
माहेश्वरी महामाया भैरवी भीमरूपिणी ।
अष्टौ च शक्तयः सर्व्वा रक्षणाः प्रययुर्मुदा ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे बाणयुद्धं नाम ११९ अध्यायः ॥ * ॥